श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनरसिंहाचार्यस्वामी विरचिता

# ॥ श्रीतोयाद्रिरङ्गनाथप्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीतोयाद्रिरङ्गनाथप्रपत्तिः ॥

श्रीभूकराब्जमृदुलार्पणहृष्यमाणौ
संसारवारिनिधितारणभद्रपोतौ।
तेजःप्रवाहपरिपूरितसर्वलोकौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 1 ॥

नाभीसरोजचतुराननगीयमानौ
नानापुमर्थपरिदानसमप्रभावौ।
विक्रान्तसर्वभुवनौ भुवनैकवन्द्यौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 2 ॥

पाषाणरूपपरिवर्तितमौनिभार्यौ
यौ दण्डकापरिचितौ चरणत्रशून्यौ।
सीताहनूमदुपलालितसेवितौ तौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 3 ॥

निर्भग्नघोरशकटौ हृतसर्पगर्वौ
गोपीसुशिक्षितपयोनवनीतनाट्यौ।
बृन्दावनीपुलकितौ कृतदूत्यवृत्तौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 4 ॥

त्रय्यन्तसूक्तिमहिलामकुटायमानौ
संसारघोरतिमिरापहरत्नदीपौ।
ब्रह्माण्डकोट्ययुतजीवशकुन्तनीडौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 5 ॥

“पश्यन्ति सूरय” इति प्रथितप्रभावौ
यौ “मध्य उत्स” इति सूच्यशरण्यभावौ।
निर्यत्नसिद्धपरतत्त्वमहत्वभाजौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 6॥

वज्रध्वजाङ्कुशसुधाकलशातपत्रैः
शङ्खासिचामरगदाप्रमुखैश्च चिह्नैः।
संलक्षितौ भुवनरक्षणदीक्षितौ तौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 7॥

सम्यक्प्रफुल्लकमलोदरमध्यपत्री -
पुत्रायमाणपरिपेशलसौकुमार्यौ।
प्रख्यातभूतपरकालमुनीन्द्रगीतौ
तोयाद्रिनाथचरणो शरणं प्रपद्ये॥ 8॥

भास्वन्नखांशुपरिभूतशशाङ्कबिम्बौ
आरुण्यपुञ्जपरिकुण्ठितभानुभासौ।
वाचामगोचरमहासुषमाविलासौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 9॥

वैखानसागमविधानसमर्च्यमाणौ
सद्भोगमोक्षफलयुग्मविधानदक्षौ।
निक्षेपणादपि भुवि क्लममादधानौ
तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 10॥

मोक्षप्रदायिसुरकल्पकपल्लवाभौ ब्रह्मेन्द्रमुख्यदिविषत्परिषन्निषेव्यौ।
अन्योन्यसाम्यपरिकल्प्यसहोदरत्वौ तोयाद्रिनाथचरणौ शरणं प्रपद्ये॥ 11॥

॥ इति श्रीतोयाद्रिरङ्गनाथप्रपत्तिः समाप्ता॥